# शोधनिष्कर्षः

# शोधनिष्कर्षः

शोधप्रबन्धेऽस्मिन्प्राचीनार्वाचीननवांशाधारितहोराशास्त्रीयस्वरूपम्,

उत्पत्तिः, भेदप्रभेदाः, नाड्याधारितफलनिदर्शनम्, ग्रहाणां बलाबलम्, भावाधारितफलञ्च शास्त्रोक्तरीत्या संश्लिष्य विश्लिष्य च कृतम्। यैः ज्ञायते यत् मानवजीवनस्योपरि ग्रहाणाम्, भावानाम्, नवांशस्य च प्रभावाः मानवजीवनोपरि जायन्त एव तथा च प्रभावप्रतिफलकथनमपि प्रबन्धेऽस्मिन् उपबन्धितम्। होराशास्त्रे अस्माकं प्राचीनाचार्यैः प्रतिपादितानां नियमानां परिपालयन्तः अनुसेव्यश्च जनाः लोके सुखमाप्नुवान्ति सुखिनश्च भवन्ति । अत एव मानवैः प्रमादं विहाय नियमानामेषां पालनं शास्त्राज्ञायाश्चानुसरणं सततमेव कर्त्तव्यं येन दुःखस्य हानिः सुखस्य च प्राप्तिः स्यात् । एतान् सिद्धान्तान् संक्षेपतो विज्ञाय तदनुरूपं कार्यं कुर्युः । निष्कर्षरूपेण वक्तुं शक्यते यत् होराशास्त्रीयनियमाः मानवजीवनस्य सुखावाप्तये वर्तते इति निश्चप्रचम्। शोधप्रबन्धोऽयंहोराशास्त्रजिग्रासूनामाधुनिकदृष्ट्या अध्येतृणां शोधार्थिनाञ्च कृते उपयोगी तथा सामाजिकदृष्ट्यापि महादुपकारको भविष्यतीति मे द्रढीयान् विश्वासः ।